13. उपसर्गाणां धातूनां च योगेन सार्थकशब्दरचनां कुरुत।

| | उपसर्ग | | धातु | = | |
|---|---|---|---|---|---|
| 1. | उद् | + | स्था | = | ............................................ |
| 2. | निर् | + | गम् | = | ............................................ |
| 3. | अधि | + | कृ | = | ............................................ |
| 4. | आङ् | + | हृ | = | ............................................ |


RCScE राजस्थान स्कूल शिक्षा परिषद

| | | | | | |
|---|---|---|---|---|---|
| 5. | उद् | + | पत् | = | ............................................ |
| 6. | दुर् | + | लभ् | = | ............................................ |
| 7. | आङ् | + | धा | = | ............................................ |
| 8. | निर् आ | + | कृ | = | ............................................ |
| 9. | अधि | + | शी | = | ............................................ |
| 10. | आङ् | + | गम् | = | ............................................ |

14. दुर् उपसर्गयुक्तं पदं लिखत्।
15. उद् उपसर्गयुक्तं पदं लिखत्।
16. अधि उपसर्गयुक्तं पदं लिखत्।
17. निर् उपसर्ग युक्तं पदं लिखत्।
18. निस् उपसर्गयुक्तं पदं लिखत्।
19. पृथकं कृत्वा लिखत् - निर्बलः, आगमनम्, आनयति।
20. पृथकं कृत्वा लिखत् - उत्तिष्ठतु, निर्गच्छति।

# ( 7 ) शब्दरूपाणि:

1. संस्कृते कति वचनानि?

(अ) एक: (ब) द्वौ (स) त्रय: (द) चत्वार: (स)

2. विभक्त्य: कति भवन्ति?

(अ) सप्त: (ब) चत्वार: (स) पञ्च: (द) षड् (अ)

3. तृतीया विभक्ति कस्मिन् पदे अस्ति?

(अ) छात्रम् (ब) छात्रेण (स) छात्रेषु (द) छात्रा (ब)

4. हरि शब्दस्य प्रथमा बहुवचम्?

(अ) हरि: (ब) हरिम् (स) हरय: (द) हरये (स)

5. पिता शब्दे विभक्ति: अस्ति?

(अ) तृतीया (ब) पंचमी (स) सप्तमी (द) प्रथमा (द)

6. 'गोभि:' अस्मिन् पदे वचनम् अस्ति?

(अ) एकवचनम् (ब) बहुवचनम् (स) द्विवचनम् (द) सर्वे: (ब)

7. 'गुरु शब्दस्य' प्रथमा द्विवचनस्य रुपम् अस्ति?

(अ) गुरु: (ब) गुरुन् (स) गुरुणा (द) गुरुम् (अ)

8. 'नद्याम्' अत्र विभक्ति: अस्ति?

(अ) सप्तमी (ब) षष्ठी (स) पंचमी (द) तृतीया (अ)

9. 'वधू' शब्दस्य तृतीया एकवचम् –

(अ) वधवा (ब) वधूम् (स) वध्वा (द) वधू: (स)

10. 'अहम्' अत्र क: पुरुष:?

(अ) प्रथम पुरुष (ब) उत्तमपुरुष (स) मध्यमपुरुष (द) सर्वे: (ब)

11. 'मम' अत्र विभक्ति: अस्ति।

(अ) तृतीया (ब) पंचमी (स) सप्तमी (द) षष्ठी (द)

12. 'युष्मद्' पदे क: पुरुष:?

(अ) प्रथम पुरुष (ब) मध्यम पुरुष (स) उत्तम पुरुष (द) सर्वे: (ब)

13. 'त्वम्' अत्र विभक्ति: अस्ति।

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) पंचमी (अ)

14. 'अस्मद्' शब्दस्य तृतीया एकवचनस्य रूपम् अस्ति।

(अ) माम् (ब) मत (स) मयि (द) मया (द)

15. 'केन' अत्र क: विभक्ति:?

(अ) प्रथमा (ब) तृतीया (स) षष्ठी (द) सप्तमी (ब)


RCScE राजस्थान स्कूल शिक्षा परिषद

16. 'किम्' शब्दस्य सप्तमी एकवचनम् –

(अ) कस्य (ब) कस्मात् (स) कस्मिन् (द) केषु (स)

17. 'सर्वाणि' अत्र वचनम् अस्ति।

(अ) एकवचनम् (ब) बहुवचनम् (स) द्विवचनम् (द) सर्वे: (ब)

18. 'सर्वा' – अत्र विभक्ति: अस्ति?

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) पंचमी (अ)

19. 'किम्' शब्दस्य सप्तमी एकवचने (स्त्री.) रूपं भविष्यति –

(अ) कस्मिन् (ब) कस्मात् (स) कस्या: (द) कस्याम् (द)

20. 'वधू' शब्दस्य सप्तमी एकवचने रूपं भविष्यति –

(अ) वध्वा: (ब) वध्वै (स) वध्वाम् (द) वध्वा (स)

21. अहं ................ सेवां करोमि।

(अ) गुरुम् (ब) गुरो: (स) गुरुणा (द) गुरवे (ब)

22. ............. बालका: गृहं गच्छन्ति –

(अ) एते (ब) एष: (स) एता: (द) एतानि (अ)

23. ................ बालका: गच्छन्ति –

(अ) तौ (ब) स: (स) ते (द) इदम् (स)

24. ते .............. स्त्रीणां पुत्रा: आसन् –

(अ) तासाम् (ब) तस्य (स) ताभ्य: (द) तेषाम् (अ)

25. वसन्ते ........... पुष्पाणि विकसन्ति –

(अ) सर्वे (ब) सर्वान् (स) सर्वस्मिन् (द) सर्वाणि (द)

26. विभक्तिप्रयोगेण रिक्तस्थानानि पूरयत।

1. बालक: ................. सह ग्रामं गच्छति। (पितृ)
2. कृष्ण: .................... दुग्धं दोग्धि। (गो)
3. जना: ..................... आशीर्वादं यच्छन्ति। (वधू)
4. राधा ...................... पत्रं लिखति। (हस्त)
5. मम उपरि ................ कृपा अस्ति। (हरि)

27. निम्न पदानां विभक्ति-वचनं-लिखत् –

| पद – | विभक्ति | वचन |
|---|---|---|
| 1. वध्वाम् | ........................... | ............................ |
| 2. रामै: | ............................ | ............................ |
| 3. मम | ............................. | ............................. |

| | | | |
|---|---|---|---|
| 4. | येषाम् | .............................. | ............................ |
| 5. | सर्वा | .............................. | ............................ |
| 6. | सर्वाणि | .............................. | ............................ |
| 7. | कस्मात् | .............................. | ............................ |
| 8. | नद्याम् | .............................. | ............................ |
| 9. | नदीनाम् | .............................. | ............................ |
| 10. | हरौ | .............................. | ............................ |

28. 'छात्र' शब्दस्य तृतीया बहुवचने रूपम् ..............................
29. हरिशब्दस्य प्रथमा बहुवचने रूपम् ..............................
30. पितृशब्दस्य सप्तमी बहुवचने रूपम् ..............................
31. गौशब्दस्य पञ्चमी एकवचने रूपम् ..............................
32. नदीशब्दस्य षष्ठी एकवचने रूपम् ..............................
33. सर्वशब्दस्य प्रथमा बहुवचने रूपम् (स्त्री.) ..............................
34. तत्शब्दस्य तृतीयाएकवचने रूपम् (नपु.) ................................
35. किम्शब्दस्य पंचमी एकवचने रूपम् (स्त्री.) ..............................

## ( 8 ) धातु रूपाणि:

1. संस्कृते मुख्यतय: कति लकारा:?

(अ) चत्वार: (ब) पञ्च: (स) सप्त: (द) दशम् (ब)

2. लकारप्रयोगे कति पुरुषा: भवन्ति?

(अ) त्रय: (ब) चत्वार (स) पञ्च: (द) सप्त (अ)

3. भू धातु: वर्तते –

(अ) परस्मैपदी (ब) आत्मनेपदी (स) उभयपदी (द) सर्वे (अ)

4. सेव धातु: वर्तते –

(अ) परस्मैपदी (ब) आत्मनेपदी (स) उभयपदी (द) सर्वे (ब)

5. 'भू' धातो: लट्लकारस्य मध्यमपुरुष एकवचने रूपम् –

(अ) भवति (ब) भवामि (स) भवसि (द) भवत् (स)

6. 'गम्' धातो: लङ्लकारस्य प्रथमपुरुष एकवचने रूपम् –

(अ) अगच्छन् (ब) अगच्छत् (स) अगच्छ (द) गच्छेत् (ब)

7. 'गछेम' अस्मिन् पदे क: पुरुष:?

(अ) प्रथम पुरुष (ब) मध्यम पुरुष (स) उत्तम पुरुष (द) सर्वे (स)

8. 'इच्छति' अत्र धातु: क: वर्तते?

(अ) इस् (ब) इश् (स) इत् (द) इष् (द)

9. भयवाचक: धातु वर्तते –

(अ) भी (ब) दा (स) सेव (द) कृ (अ)

10. 'ददाति' अस्मिन् पदे क: लकार: वर्तते –

(अ) लोट् (ब) लट् (स) लङ् (द) लृट् (ब)

11. 'नर्तिष्यसि' अत्र क: लकार: –

(अ) लट् (ब) लोट (स) लङ् (द) लृट् (द)

12. लिख् धातो: विधिलिङ्गलकारस्य रूपम् अस्ति –

(अ) लिखति (ब) लिखसि (स) अलिखत् (द) लिखेत् (द)

13. सेवसे अत्र क: लकार: वर्तते?

(अ) लोट (ब) लट् (स) लङ् (द) लृट् (ब)

14. 'सेवेरन्' अत्र क: लकार: वर्तते?

(अ) लट् (ब) लोट् (स) लङ् (द) विधिलिङ्ग (द)

15. 'अकरोत्' अत्र क: लकार: वर्तते?

(अ) लङ् (ब) लट् (स) लोट् (द) लृट् (अ)


RCScE राजस्थान स्कूल शिक्षा परिषद

16. 'सर्वाणि' पदे कः पुरुषः?

(अ) उत्तमपुरुष (ब) प्रथमपुरुष (स) मध्यम् पुरुष (द) सर्वे (ब)

17. धातु प्रयोगेण रिक्तस्थानानि पूरयत –

1. रामः कलमेन पत्रं ........................ (लिख् + लट्)
2. तव् अवलोक्य शृंगालः .................... (चिन्त् + लङ्)
3. सः त्वं च विद्यालयं ........................ (गम् + लट्)
4. अहं त्वं च विद्यालयं ....................... (गम् + लृट्)
5. कृष्णः श्वः लेखं ................. (लिख् + लङ्)
6. शिष्यः विद्यालये ज्ञानं ............... (लभ् + लट्)
7. देवाः प्रजापतिं ........................ (प्रच्छ् + लट्)
8. मोहनः बसयानात् जयपुरं .............. (गम् + लृट्)

18. निम्न पदानां लकार – पुरुष – वचनं लिखत –

| | पद | – | लकार | पुरुष | वचन |
|---|---|---|---|---|---|
| 1. | गच्छति | – | ................ | ................ | ................ |
| 2. | गच्छथः | – | ................ | ................ | ................ |
| 3. | अगच्छत् | – | ................ | ................ | ................ |
| 4. | भविष्यति | – | ................ | ................ | ................ |
| 5. | इच्छेत् | – | ................ | ................ | ................ |
| 6. | हनिष्यति | – | ................ | ................ | ................ |
| 7. | ददति | – | ................ | ................ | ................ |
| 8. | करोषि | – | ................ | ................ | ................ |
| 9. | त्यजति | – | ................ | ................ | ................ |
| 10. | क्रिडेत् | – | ................ | ................ | ................ |
| 11. | पृच्छानि | – | ................ | ................ | ................ |
| 12. | सेवावहे | – | ................ | ................ | ................ |
| 13. | लभामहे | – | ................ | ................ | ................ |
| 14. | नृत्यावः | – | ................ | ................ | ................ |
| 15. | अगच्छत् | – | ................ | ................ | ................ |
| 16. | नृत्यानि | – | ................ | ................ | ................ |
| 17. | प्रक्ष्यति | – | ................ | ................ | ................ |
| 18. | नृत्येव | – | ................ | ................ | ................ |

19. सेवे – ................. ................. .................

20. त्यक्षति – ................. ................. .................

19. निम्नलिखित धातूनां यथानिर्दिष्टं रूपाणि लिखत –

1. इष् (लङ्लकारस्य उत्तमपुरुषे) – ................................................

2. प्रच्छ् (लोटलकारस्य प्रथमपुरुषे) – ................................................

3. हन् (लट्लकारस्य मध्यमपुरुषे) – ................................................

4. दा (लृट्लकारस्य प्रथमपुरुषे) – ................................................

5. सेव (लट्लकारस्य प्रथमपुरुषे) – ................................................

20. निम्नलिखितानां क्रियापदानां धातुः लिखत –

| क्रियापदम | – | धातुः |
|---|---|---|
| 1. भवति | – | ............................. |
| 2. गच्छति | – | ............................. |
| 3. इच्छति | – | ............................. |
| 4. ऐच्छत् | – | ............................. |
| 5. पृच्छति | – | ............................. |
| 6. प्रक्ष्यति | – | ............................. |
| 7. अलिखत् | – | ............................. |
| 8. अहन् | – | ............................. |
| 9. ददाति | – | ............................. |
| 10. जायते | – | ............................. |

# ( 9 ) संख्याज्ञानम्ः

1. संख्यावाचक शब्दानां प्रयोगः भवति?

(अ) विशेषण रूपेण (ब) विशेष्य रूपेण

(स) उपसर्ग रूपेण (द) अव्यय रूपेण (अ)

2. अस्माकं गृहे ....................... (18) सदस्याः।

(अ) पञ्चदश (ब) षोडश (स) अष्टादश (द) नवदश (स)

3. मम विद्यालये ....................... (19) प्रकोष्ठाः।

(अ) विंशति (ब) एकविंशति (स) एकोनविंशति (द) एकादश (स)

4. 2024 इत्यस्य संस्कृत रूपं भवति।

(अ) चर्तुविंशत्याधिकद्विशतम् (ब) एकविंशत्याधिकशतम्

(स) एकविंशतिशतम् (द) एकविंशतिद्विशतम् (अ)

5. निम्न संस्कृत शब्दान् अंकेषु लिखत।

| | | | |
|---|---|---|---|
| 1. द्विशतम् | – | 6. नवाधिकशतम् | – |
| 2. सहस्त्रम् | – | 7. पञ्चविंशत्यधिकशतम् | – |
| 3. द्विसहस्त्रम् | – | 8. चतुः शतम् | – |
| 4. त्रिशतम् | – | 9. द्विसहस्त्रम् | – |
| 5. द्विशतम् | – | 10. त्रिशतम् | – |

6. निम्न अंकान् संस्कृतेषु लिखत।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1. | 105 | – | 6. | 250 | – | 11. | 382 | – |
| 2. | 150 | – | 7. | 260 | – | 12. | 401 | – |
| 3. | 185 | – | 8. | 280 | – | 13. | 508 | – |
| 4. | 190 | – | 9. | 310 | – | 14. | 480 | – |
| 5. | 205 | – | 10. | 340 | – | 15. | 488 | – |

कक्षा–10 (संस्कृत)

## खण्ड - घ - पठितावबोधनम् ( सत्र 2023–24 )

### ( 1 ) पाठ्यपुस्तकात् बहुविकल्पात्मक प्रश्नाः

1. 'शुचिपर्यावरणम्' इति पाठस्य लेखकः कः?
   (अ) जगन्नाथः (ब) हरिदत्त शर्मा (स) प्रभाकर शास्त्री (द) कलानाथ शास्त्री (स)
2. कुत्र दुर्वहम् जीवितम्?
   (अ) महानगरमध्ये (ब) ग्रामे (स) कान्तारे (द) कोऽपि न (अ)
3. कज्जलमलिनं धूमं किं मुञ्चति?
   (अ) ललितलतानाम् (ब) शतशकटीयानम् (स) अशुद्धय (द) वाष्पयानमाला (ब)
4. दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।
   (अ) दुष्करम् (ब) जातम् (स) कालायासचक्रम (द) वक्रम (अ)
5. 'शुचि पर्यावरणम्' इति पाठः कुतः संकलितः?
   (अ) महाभारततः (ब) लसल्लतिकातः (स) रघुवंशतः (द) रामायणतः (ब)
6. कुत्सि वस्तुमिश्रितं किं जातम्?
   (अ) कूपम् (ब) भक्ष्यम् (स) जलम् (द) वायुमण्डलम् (ब)
7. का रसालं मिलिता?
   (अ) नवमालिका (ब) चटका (स) भ्रमरपंक्तिः (द) कुसुमावलिः (अ)
8. अद्य धरातलं कीदृशं जातम्?
   (अ) समलम् (ब) पवित्रम् (स) शुद्धम् (द) निर्मलम् (अ)
9. केषां माला रमणीया?
   (अ) रूप्यकाणाम् (ब) मौक्तिकानाम् (स) ललितलतानाम् (द) पुष्पाणाम् (स)
10. 'बुद्धिर्बलवती सदा' इति पाठः कस्मात् ग्रन्थात् संकलितः?
    (अ) रामायणतः (ब) कथाग्रन्थात् (स) शुकसप्ततेः (द) कुतोऽपि नः (स)
11. राजसिंहः पत्न्याः नाम किं आसीत्?
    (अ) वासवदत्ता (ब) शकुन्तला (स) बुद्धिमती (द) वसुमति (स)
12. राजपुत्रः नाम किम् आसीत्?
    (अ) कृष्णचन्द्रः (ब) राजचन्द्रः (स) राजसिंहः (द) श्रीचन्द्रः (स)
13. व्याघ्रं कुत्र ददर्श?
    (अ) पर्वते (ब) गुहायाम् (स) उपवने (द) गहनकानने (द)



RCScE राजस्थान स्कूल शिक्षा परिषद

14. वृषभः कुत्र पपात?
(अ) क्षेत्रे (ब) उपवने (स) पर्वते (द) गुहायाम् (अ)

15. भयाकुलं व्याघ्रं दृष्ट्वा कः हसति?
(अ) राजसिंहः (ब) मृगः (स) श्रृगालः (द) बुद्धिमती (स)

16. राजसिंह कस्मिन् ग्रामे वसति स्म?
(अ) राजपुरे (ब) प्रयागे (स) देउलाख्ये (द) कामाख्ये (स)

17. किं दृष्ट्वा बुद्धिमती चिन्तितवती?
(अ) सूकरं (ब) जम्बुकं (स) चित्रकं (द) व्याघ्रं (द)

18. यामिनी भयात् कया विमुक्ता?
(अ) पराक्रमेण (ब) धनेन (स) निजबुद्धया (द) बलेन (स)

19. 'शिशुलालनम्' इति पाठस्य रचयिता कः?
(अ) नारायण पण्डितः (ब) श्रीधर भास्करः (स) पं. विष्णु शर्मा (द) दिङ्नागः (द)

20. बालभावात् हिमकरः कस्य मस्तके विराजते?
(अ) विष्णोः (ब) गगनस्य (स) पर्वतस्य (द) शिवस्य (द)

21. लवकुशयोः वंशस्य कर्ता कः?
(अ) हरिश्चन्द्रः (ब) वशिष्ठः (स) सूर्य (द) चन्द्रः (स)

22. 'शिशुलालनम्' इति पाठः कुतः संकलित?
(अ) हितोपदेशतः (ब) रामायणतः (स) महाभारततः (द) कुन्दमालातः (द)

23. लवकुशयोः गुरोः नाम किं आसीत्?
(अ) द्रौणाचार्यः (ब) वाल्मिकीः (स) कालिदासः (द) वेदव्यासः (ब)

24. वयोऽनुरोधात् कः लालनीयः भवति?
(अ) मित्रम् (ब) पिता (स) शिशुजन (द) पुत्रः (स)

25. कुशः स्वपितुः किन्नाम कथयति?
(अ) निर्लिप्तः (ब) निरनुक्रोशः (स) निकृष्टः (द) निर्दयी (ब)

26. कुशलवौ कम् उपसृत्य प्रणमतः?
(अ) रामम् (ब) वाल्मिकी (स) लक्ष्मणम् (द) विद्वषकम् (अ)

27. 'जननी तुल्यवत्सला' इति पाठस्य मूलं किम्?
(अ) हर्षचरितम् (ब) महाभारतम् (स) कादम्बरी (द) रामायणम् (ब)

28. दुर्बले सुते कस्याः अत्यधिका कृपा भवति?
(अ) मातुः (ब) पितुः (स) कन्यायाः (द) भगिन्याः (स)

29. 'सर्वेषु' अपत्येषु जननी कीदृशी भवति?
(अ) प्रसन्ना (ब) असमम् (स) तुल्यवत्सला (द) कातरा (स)

30. कस्याः नेत्राभ्याम् अश्रूणि आविरासन्?

(अ) इन्द्रस्य (ब) कृषकस्य (स) सुरभेः (द) वृषभस्य (स)

31. सर्वधेनूनां माता का आसीत्?

(अ) माया (ब) सुरभिः (स) रम्भाः (द) चम्पाः (ब)

32. 'जननी तुल्यवत्सला' इति पाठः महाभारतस्य कस्मात् पर्वणः उद्धृतः?

(अ) विराट (ब) वन (स) कर्ण (द) भीष्म (ब)

33. माता सुरभिः किमर्थम् अश्रूणि मुञ्चति स्म?

(अ) जगतः पीडां दृष्ट्वा (ब) स्वविवशतां दृष्ट्वा

(स) पुत्रस्य दैन्यं दृष्ट्वा (द) कृषीवलस्य अत्याचार दृष्ट्वा (स)

34. नराणां प्रथमः शत्रुः कः?

(अ) गुणः (ब) द्वेषः (स) शमः (द) क्रोधः (स)

35. पिककाकयोः भेदः कदा दृश्यते?

(अ) ग्रीष्मकाले (ब) बसन्तकाले (स) रात्रौ (द) वर्षाकाले (ब)

36. सम्पत्तौ विपत्तौ च केषाम् एकरूपता भवति?

(अ) बालकानाम् (ब) धनिकानाम् (स) बलीनाम् (द) महताम् (द)

37. किं कृत्वा मनुष्यः नावसीदति?

(अ) उद्यमम् (ब) तपः (स) धनार्जनम् (द) युद्धम् (अ)

38. गुणी किं वेति?

(अ) आचारम् (ब) गुणम् (स) धनम् (द) ज्ञानम् (ब)

39. कः पिपासितः म्रियते?

(अ) बकः (ब) चातकः (स) काकः (द) पिकः (ब)

40. पिता पुत्राय बाल्ये किं यच्छति?

(अ) विद्याधनम् (ब) भोजनम् (स) रजतम् (द) स्वर्णम् (अ)

41. कीदृशे प्रदेशे पदयात्रा न सुखवहा?

(अ) शीतप्रदेशे (ब) विजने प्रदेशे (स) हिमप्रदेशे (द) उष्ण प्रदेशे (ब)

42. कः वातावरणं कर्कशध्वनिना आकुलीकरोति?

(अ) वकः (ब) उल्लूकः (स) काकः (द) पिकः (स)

43. प्राणेभ्योऽपि किं रक्षेत्?

(अ) गृहम् (ब) पुत्रम् (स) सदाचारम् (द) धनम् (स)

44. ज्वालामुखविस्फोटैः गगनं कीदृशं जायते?

(अ) श्वेतम् (ब) धूमयस्मावृतम् (स) पीतम् (द) कृष्णम् (ब)



RCScE राजस्थान स्कूल शिक्षा परिषद

45. मालाकारेण निदाधे कस्य पुष्टिः व्यरचि?

(अ) भ्रमराः (ब) मेघाः (स) पतंगाः (द) तरोः (द)

46. किं कृत्वा मनुष्यः नावसीदति?

(अ) तपः (ब) युद्धम् (स) धनार्जनम् (द) उद्यमम् (द)

47. पूर्णदिनं निद्रायमाणः कः तिष्ठति?

(अ) उलूकः (ब) प्रकृतिमातुः (स) वकः (द) सिंहः (अ)

48. 'अरे वानर तूष्णीं भव' इति कः कथयति?

(अ) गजः (ब) मयूरः (स) पिकः (द) वकः (ब)

49. स्थितप्रज्ञः इव कः ध्यानमग्नः तिष्ठति?

(अ) वायसः (ब) वकः (स) सिंहः (द) गजः (स)

50. कः आत्मानं बलशाली, विशालकायः पराक्रमी च कथयति?

(अ) गजः (ब) वानरः (स) सिंहः (द) व्याघ्रः (अ)

51. उच्चैः कौशितुं कः आरभत् –

(अ) अतिथि (ब) ग्रामवासिनः (स) चौरः (द) न्यायाधीशः (अ)

52. न्यायाधीशे नाम किम् आसीत्?

(अ) प्रकाशचन्द्रः (ब) विपिनचन्द्रः (स) वंकिमचन्द्रः (द) ईश्वरचन्द्र (स)

53. चौरस्य पादध्वनिना कः प्रबुद्धः –

(अ) आरक्षी (ब) अतिथिः (स) दम्पति (द) न्यायाधीशः (ब)

54. कः प्रावारकमपसार्य उतिष्ठत् –

(अ) शवः (ब) नागरिकः (स) अतिथि (द) आरक्षी (अ)

55. कः निकषा मृत शरीरम् आसीत्?

(अ) न्यायालयम् (ब) विद्यालयम् (स) राजमार्गम् (द) देवालयम् (स)

56. 'विचित्र साक्षी' इति कथायाः लेखकः कः?

(अ) विशाखदत्तः (ब) विष्णुदत्तः (स) शूद्रकः (द) ओमप्रकाश ठक्कुर (द)

57. अतिथि कैन प्रबुद्धः?

(अ) भूकम्पेन (ब) प्रवर्षेण (स) पादध्वनिना (द) चण्डवातेन (स)

58. 'सूक्तयः' पाठः तमिलभाषायाः कस्मिन् ग्रन्थात् गृहीतोऽस्ति –

(अ) तिरूकुरल् (ब) हितोपदेशः

(स) पंचतंत्र (द) अभिज्ञानशाकुन्तलम् (अ)

59. अस्मिन् लोके के एव चक्षुष्मन्तः प्रकीर्तिताः?

(अ) दुर्जनः (ब) विद्वांसः (स) सन्तः (द) सज्जनः (ब)



RCScE राजस्थान स्कूल शिक्षा परिषद

60. विमूढधी: कीदृशीं वाचिं परित्यजति?

(अ) दु:खप्रदाम् (ब) माधुर्यप्रदाम् (स) धर्मप्रदाम् (द) सुखप्रदाम् (स)

61. 'भूकम्पविभीषिका' इति पाठे कस्मिन् क्षेत्रे वर्णनं अस्ति -

(अ) पंजाब क्षेत्रम् (ब) गुर्जर क्षेत्रम् (स) कश्मीर क्षेत्रम् (द) राजस्थान क्षेत्रम् (ब)

62. कस्य उपशमनस्य स्थिरोपाय: नास्ति–

(अ) भूकम्पस्य (ब) क्षुधायाम् (स) तृष्णायाम् (द) निद्रायाम् (अ)

63. चण्डवातेन मेघरवैश्च सह क: समजायत?

(अ) खग: (ब) प्रवर्ष: (स) तिमिर: (द) प्रकाश: (ब)

64. कीदृशा: प्राणिन: भूकम्पेन निहन्यत?

(अ) सम्पन्ना: (ब) विवशा: (स) सुखिना (द) दुखिना (ब)

65. कस्य शोभा एकेन राजहंसेन भवति?

(अ) सरस: (ब) आकाश: (स) पृथ्वी (द) उद्यान: (अ)

66. क: शंकनीय: भवति?

(अ) अनादर: (ब) अत्यादर: (स) साहस: (द) अट्टाहास: (ब)

67. वाचि किं भवेत्?

(अ) वक्रता (ब) अवक्रता (स) उग्रता (द) सरलता (अ)

68. काक: कस्य सन्ततिं पालयति?

(अ) बकस्य (ब) पिकस्य (स) सिंहस्य (द) चातकस्य (ब)

69. के रसालमुकुलानि समाश्रयन्ते?

(अ) भ्रमरा: (ब) पतंगा: (स) मक्षिका: (द) खगा: (अ)

70. बक: बहुकालपर्यन्तं कुत्र वसति -

(अ) कानने (ब) उष्णजले (स) शीतलजले (द) नगरे (स)



RCScE राजस्थान स्कूल शिक्षा परिषद

## (11) पाठ्यपुस्तकात् अंशत्रयम् (गद्यांशः, पद्यांशः नाट्यांशः) प्रश्नाः

### गद्यांशः प्रश्नाः

(1)

सर्वे पक्षिणः - (उच्चैः) - आम् आम् - कश्चित् खगः एव वनराजः भविष्यति इति।

(परं कश्चिदपि खगः आत्मानं बिना नान्यं कमपि अस्मै पदाय योग्यं चिन्तयति तर्हि कथं निर्णयः भवेत् तदा तैः सर्वैः गहननिद्रायां निश्चिन्तं स्वपन्तम् उलूकं वीक्ष्य विचारितम् यदेषः आत्मश्लाघाहीनः पदनिर्लिप्तः उलूको एवास्माकं राजा भविष्यति। परस्परमादिशन्ति च तदानीयन्तां नृपाभिषेकसम्बधिन३ सम्भाराः इति।)

प्रश्नाः (क) एकपदेन उत्तरत -

(1) कश्चित् खगः एव कः भविष्यति?

(2) आत्मश्लाघाहीनः कः आसीत्?

(ख) पूर्णवाक्येन उत्तरत -

(1) सर्वे पक्षिणः कीदृशं उलूकं पश्यन्ति?

(2) पक्षिणः किम् आनेतुम् आदिशन्ति?

(ग) यथानिर्देशम् उत्तरं लिखत -

(1) 'स्वपन्तम्' इति विशेषणपदस्य विशेष्यपदं किम्?

(2) 'आदिशन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(2)

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषां आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृहणाच्च परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्।" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथि चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

प्रश्ना - (क) एकपदेन उत्तरत -

(1) गृहे कः प्रविष्टः?

(2) के अतिथिम् अभर्त्सयन्?

(ख) पूर्णवाक्येन उत्तरत -

(1) चौरः उच्चैः क्रोशितुं किम् आरभत?

(2) रक्षापुरुषः अतिथिं किं प्रख्याप्य कारागृहे प्राक्षिपत्?

(ग) यथानिर्देशम् उत्तरं लिखत -

(1) 'विचित्रा दैवगति' अत्र विशेषणपदं लिखत।

(2) 'ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छन्' अत्र 'आगच्छन्' इति क्रियापदस्य कर्तृपदं लिखत।

**पद्यांश प्रश्नाः**

**( 1 )**

भुक्ता मृणालपटली भवता निपीता -
न्यूम्बूनि यत्र नलिनानि निषेवितानि।
रे राजहंस। वद तस्य सरोवरस्य,
कृत्येन केन भवितासि कृतोपकारः।।

प्रश्नाः (क) एकपदेन उत्तरत -

(1) राजहंसेन कानि निपीतानि?

(2) नलिनानि केन निषेवितानि?

(ख) पूर्णवाक्येन उत्तरत -

(1) राजहंसेन सरोवरस्य का भुक्ता?

(2) राजहंसः कस्य कृतोपकारकः भवति?

(ग) यथानिर्देशम् उत्तरं लिखत -

(1) 'निपीतानि' इति क्रियापदस्य अन्वयः केन पदेन सह वर्तते?

(2) 'भवता' इति सर्वनामपदस्थाने संज्ञापदं लिखत।

(2)

वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते।।

प्रश्ना (क) एकपदेन उत्तरत -

(1) मन्त्री सभायां कीदृशं भवेत्?

(2) मन्त्री कुत्र अकातरः भवेत्?

(ख) पूर्णवाक्येन उत्तरत -

(1) मन्त्री कीदृशः भवेत्?

(2) कीदृशः मन्त्री केनापि प्रकारेण परैः न परिभूयते?

(ग) यथानिर्देशं उत्तरं लिखत -

(1) 'वाक्पटुधैर्यवान् मन्त्री' - अत्र विशेष्यपदं किम्?

(2) 'परैर्न परिभूयते' - अत्र क्रियापदं किम्?

## नाट्यांश प्रश्ना:

(1)

राम: – कथमस्मत् समाजाभिजनौ संवृत्तौ?

विदूषक: – किं द्वयोरप्येकमेव प्रतिवचनम्?

लव: – भ्रातरावावां सोदर्यौ।

राम: – समरूप: शरीरसन्निवेश:। वयसस्तु न किञ्चिदन्तरम्।

लव: – आवां यमलौ।

राम: – सम्प्रति युज्यते। किं नामधेयम्।

लव: – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयाणि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् .....।

कुश: – अहमपि कुश इत्यात्मानं श्रावयायि।

राम: – अहो! उदात्तरम्य: समुदाचार:।
किं नामधेयो भवतोर्गुरु:?

प्रश्ना: (क) एकपदेन उत्तरत –

(1) कुशलवौ कीदृशौ भ्रातरौ आस्ताम्?

(2) लवकुशयो: शरीरसन्निवेश: कीदृश: आसीत्?

(ख) पूर्णवाक्येन उत्तरत –

(1) कयो: एकमेव प्रतिवचनम् आसीत्?

(2) लवकुशयो: समुदाचार: कीदृश: आसीत्?

(ग) यथानिर्देशम् उत्तरं लिखत –

(1) 'कथमस्यत् समानाभिजनौ' इत्यत्र 'अस्मत्' सर्वनामपदं कस्मै प्रयुक्तम्?

(2) 'समुदाचार:' इत्यत्र विशेषणपदं नाट्यांशात् चित्वा लिखत।

(2)

काक: – रे परभृत्! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्यु: पिका:? अत: अहम् एव करूणापर: पक्षिसम्राट् काक:।

गज: – समीपत: एवागच्छन् अरे! अरे! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकाय:, बलशाली, पराक्रमी च। सिंह: वा स्यात् अथवा अन्य: कोऽपि। वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्य: कोऽव्यस्ति एतादृश: पराक्रमी। अत: अहमेव योग्य: वनराजपदाय।

वानर: – अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)

प्रश्ना – (क) एकपदेन उत्तरत –

(1) काक: कस्य सन्ततिं पालयति?

(2) सर्वांवार्ता श्रुत्वा क: आगच्छति?



RCScE राजस्थान स्कूल शिक्षा परिषद

(ख) पूर्णवाक्येन उत्तरत –

(1) गजः कीदृशः अस्ति?

(2) गजः कं स्वशुण्डेन पोथयित्वा मारयिष्यति?

(ग) यथानिर्देशम् उत्तरं लिखत –

(1) 'अहम् एव करूणापरः'। अत्र 'अहम्' सर्वनामपदं कस्मैं प्रयुक्तम्?

(2) 'आगच्छम्' इति क्रियापदस्य कर्तृपदं किम्?

**( 3 ) पाठ्यपुस्तकात् पद्यांशस्य हिन्दीभाषायां सप्रसंग भावार्थलेखनम्**

(1)

संपत्तौ च विपत्तौ च, महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।

(2)

आचारः प्रथमो धर्मः, इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

**( 4 ) अन्वयलेखनम् – रिक्तस्थानपूर्तिमाध्ययेन**

(1) **बन्धुः, महान्, कृत्वा**

मनुष्याणां शरीरस्थः ............. शत्रुः आलस्यम्, उद्यमसमः ............... न अस्ति यं ........... न अवसीदति।

(2) **बकसहस्त्रेण, सरसः, परितः**

एकेन राजहंसेन ................ या शोभा भवेत्, ................ तीरवासिना ........... सा न भवति।

**( 5 ) प्रश्न निर्माणम्**

1. उद्याने **पक्षिणां** कलरव चेतः प्रसादयति।
2. शकटीयानम् **कज्जलमलिनं** धूमं मुञ्चति।
3. **प्रकृत्याः** सन्निधौ वास्तविकं सुखं विद्यते।
4. **महानगरेषु** वाहनानाम् अनन्ताः पंक्तयः धावन्ति।
5. पाषाणीसभ्यतायां **लतातरूगुल्माः** प्रस्तरतले पिष्टाः सन्ति।
6. पुरा त्वया **मह्यम्** व्याघ्रत्रयं दत्तम्।
7. त्वं **मानुषात्** विभेषि।
8. **व्याघ्र** दृष्ट्वा धूर्तः श्रृगालः अवदत्।

9. बुद्धिमती **चपेटया** पुत्रौ प्रहृतवती।
10. तत्र **राजसिंहो** नाम राजपुत्रः वसति स्म।
11. **सहस्राधिकेषु** पुत्रेषु सत्स्वपि सा दुःखी आसीत्।
12. **धेनूनाम्** माता सुरभिः आसीत्।
13. अयम् **अन्येभ्यो** दुर्बलः।
14. **सुराधिपः** ताम् अपृच्छत्।
15. सः **कृच्छ्रेण** भारम् उद्वहति।
16. सर्वे **प्रकृतिमातरं** प्रणन्ति।
17. मयूरस्य नृत्यं **प्रकृतेः** आराधना।
18. वानरः आत्मानं वनराजपदाय योग्यं मन्यते।
19. गजः वन्यपशून् तुदन्तं **शुण्डेन** पोथयित्वा मारयति।
20. सिंहः वानराभ्यां **स्वरक्षायाम्** असमर्थः एवासीत्।
21. उभौ शवं **चत्वरे** स्थापितवन्तौ।
22. स **भारवेदनया** क्रन्दति स्म।
23. न्यायाधीशः **बंकिमचन्द्रः** आसीत्।
24. **चौरस्य** पादध्वनिना अतिथिः प्रबुद्धः।
25. करूणापरो गृही **तस्मै** आश्रयं प्रायच्छत्।
26. **पुत्रं** द्रष्टुं सः प्रस्थितः।
27. आत्मकल्याणम् इच्छन् नरः **परेषाम्** अनिष्टं न कुर्यात्।
28. धैर्यवान् **लोके** परिभवं न प्राप्नोति।
29. **तत्त्वार्थस्य** निर्णयः विवेकेन कर्तुं शक्य।
30. जनकेन **सुताय** शैशवे विद्याधनं दीयते।
31. संसारे **विद्वांसः** ज्ञानचक्षुर्भिः नेत्रवन्तः कथ्यन्ते।
32. तदिदानीम् **भूकम्पकारणं** विचारणीयं तिष्ठति।
33. **एतादृशी** भयावहघटना गढ़वालक्षेत्रे घटिता।
34. विवशाः प्राणिनः **आकाशे** पिपीलिकाः इव निहन्यन्ते।
35. भूकम्पविभीषिका विशेषेण कच्छजनपदं **ध्वंसावशेषेषु** परिवर्तितवती।
36. चातकः **वने** वसति।
37. **जलदः** नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति।
38. **पतंगाः** अम्बरपथम् आपेदिरे।
39. **भृंगाः रसालमुकुलानिं** समाश्रयन्ते।
40. मालाकारः **तोयैः** तरोः पुष्टिं करोति।



RCScE राजस्थान स्कूल शिक्षा परिषद

## ( 6 ) पर्याय-विलोमपदमेलनम्

### ( 1 ) पर्याय/ समानार्थक शब्दाः मेलनम्

(1)

| क | ख |
|---|---|
| कृच्छ्रेण | वृषभः |
| चक्षुर्भ्याम् | वासवः |
| जवेन | नेत्राभ्याम् |
| इन्द्रः | अचिरम् |
| शीघ्रम् | काठिन्येन |
| बलीवर्दः | सुताः |

(2)

| क | ख |
|---|---|
| पर्याकुलम् | नष्टाः |
| विशीर्णाः | क्रोधयुक्ताम् |
| उद्गिरन्तः | संत्रोट्य |
| विदार्य | व्याकुलम् |
| प्रकुपिताम् | प्रकटयन्तः |

### (2) विलोमपद मेलनम्

(1)

| क | ख |
|---|---|
| सम्पन्नम् | प्रविशन्तीभिः |
| ध्वस्तभवनेषु | सुचिरेणैव |
| निस्सरन्तीभिः | विपन्नम् |
| निर्माय | नवनिर्मितभवनेषु |
| क्षणेनैव | विनाश्च |

(2)

| क | ख |
|---|---|
| सुकरम् | अनन्ताः |
| दूषितम् | मानवाय |
| गृहणन्ती | समलम् |
| निर्मलम् | वितरत्ती |
| दानवाय | भूषितम् |
| सान्ताः | दुर्वहम् |

## ( 7 ) पाठ्यपुस्तकात् श्लोकद्वय लेखनम्

(1) प्रस्तरतले लतातरूगुल्मा नो भवन्तु पिष्टाः।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा
मानवाय जीवनं कामये नो जीवन्मरणम्।।
शुचि पर्यावरणम्।।

(2) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

(3) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते।।


RCScE राजस्थान स्कूल शिक्षा परिषद

(4) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

(5) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना।।

## ( 8 ) एकस्य गद्यपाठस्य हिन्दीभाषायां सारलेखनम्

(1) सौहार्दं प्रकृतेः शोभा

(2) बुद्धिर्बलवती सदा

(3) विचित्रः साक्षी

समाप्तः



RCScE राजस्थान स्कूल शिक्षा परिषद

# मॉडल प्रश्न-पत्र

# विषय-संस्कृत

**कक्षा- 10**

**खण्ड-अ**

**वस्तुनिष्ठ प्रश्नाः -**

1. सिंहस्य पुच्छं कः धुनोति?

(अ) काकः (ब) मयूरः (स) वानरः (द) शृगालः (स)

2. 'शुचिपर्यावरण' पाठानुसारेण केषां माला रमणीया?

(अ) पुष्पाणाम् (ब) ललितलतानाम् (स) मौक्तिकानाम् (द) रूप्यकाणाम् (ब)

3. लोके महतो भयात् कः मुच्यते?

(अ) कुशलः (ब) धूर्तः (स) बलवान् (द) बुद्धिमान् (द)

4. 'सज्जनः' इत्यस्य पदस्य संधिविच्छेदः अस्ति -

(अ) सत्+जनः (ब) सन्+जनः (स) सः+जनः (द) सज्+जनः (अ)

5. 'चोरभयम्' इत्यत्रः कः समासः?

(अ) अव्ययीभाव (ब) तत्पुरुष (स) बहुव्रीहि (द) द्वन्द्व (ब)

6. 'अध्यक्षः' इत्यत्रः कः उपसर्ग -

(अ) अति (ब) अध् (स) अधि (द) आङ् (स)

7. 'अपहरति' पदे कः उपसर्गः?

(अ) अप (ब) अव (स) निस् (द) अपि (अ)

8. श्चुत्व संधेः उदाहरणम् अस्ति।

(अ) सुबन्तः (ब) सज्जनः (स) कृष्णः (द) अजन्तः (ब)

9. चर्त्व संधेः उदाहरणम् अस्ति -

(अ) उत्पन्नः (ब) जगदीशः (स) चोरोऽयम् (द) सज्जनः (अ)

10. उत्थानम् पदे कः उपसर्गः?

(अ) उत् (ब) उद् (स) अधि (द) आङ् (ब)

11. द्वन्द्वसमासस्य उदाहरणम् अस्ति -

(अ) दशाननः (ब) प्रत्येकम् (स) उपकृष्णम् (द) पितरौ (द)

12. अव्यय पदम् अस्ति -

(अ) उपकृष्णम् (ब) दशाननः (स) पितरौ (द) राजपुत्रः (अ)



RCScE राजस्थान स्कूल शिक्षा परिषद

13. उत्तमपुरुषस्य पदम् अस्ति –

(अ) पठति (ब) पठतु (स) पठेम: (द) पठेत् (स)

14. काकचेष्ट: विद्यार्थी कीदृश: छात्र: मन्यते?

(अ) मूर्ख: (ब) आदर्श: (स) कातर: (द) पण्डित: (ब)

15. 'शिरसि' शब्दस्य अर्थम् अस्ति।

(अ) हस्त: (ब) मस्तक: (स) हृदय: (द) शरीर: (द)

**प्रश्न-2 निर्देशानुसारं रिक्तस्थानानि पूरयत –**

(1) सदा वसन्ते ............. पुष्पाणि विकसन्ति (सर्वशब्दस्य प्रथमा बहुवचनम्)

(2) सर्वे ............ सुखिन:। (भू धातु-लोट्लकार:)

(3) विशिष्टं ज्ञानं ................ कथ्यते। (विज्ञानम्/पण्डित:)

(4) ............... नौकया नदीं तरति (नौ+ठन्)

(5) ग्रामं ............... तृणं स्पृशति। (गम्+शतृ)

(6) सुरेश: ............. बधिर: । (कर्णशब्द-तृतीय/एकवचनम्)

(7) पुस्तकं ............. भोजनं खादति (पठ्+शतृ)

**प्रश्न-3 अधोलिखितं अपठितगद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत –**

(अ) महाभारतं महर्षिणा पेदव्यासेन विरचित: बहुप्रसिद्ध: इतिहास: विद्यते। अस्मिन् ग्रन्थे कौरव-पाण्डवानां महायुद्धं मुख्य-विषयरूपेण वर्णितम् अस्ति। मानवजीवनस्य धर्म-अर्थ-काम-मोक्ष-रूपा: समस्तपुरुषार्था: अत्र वर्णिता:। अस्य ग्रन्थस्य भीष्म-पर्वणि श्रीमद्भगवद्गीता विद्यते। भगवता कृष्णेन मोहग्रस्तम अर्जुनं प्रति ज्ञान-कर्म-भक्ति-विषयक: उपदेश: गीतायां प्रदत्त:। अस्यां गीतायां अपि अष्टादश अध्याया: सन्ति। महाभारतं पञ्चमो वेद: अपि कथ्यते। कौरवा: पराजिता:, पाण्डवेषु ज्येष्ठ: युधिष्ठिर: राजसिंहासनम् आरोहत्।

**(क) एकपदेन उत्तरत –**

(1) महाभारतस्य रचयिता क:?

(2) 'श्रीमद्भगवद्गीता' कस्मिन् ग्रन्थे विद्यते?

(3) मानवजीवनस्य कति पुरुषार्था: अत्र वर्णिता:?

(4) पञ्चमो वेद: कं कथ्यते?

**(ख) पूर्णवाक्येन उत्तरत –**

(1) महाभारते मुख्य विषयरूपेण किं वर्णितमस्ति?

(2) भीष्म-पर्वणि का विद्यते?

(3) महाभारते केषां युद्धानां वर्णनम् अस्ति?

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(घ) भाषिक कार्यम् –

(1) ज्येष्ठ: इति पदस्य विलोम पद:क:?

(2) ज्येष्ठ: युधिष्ठिर: राजसिंहासनम् आरोहम् – अत्र विशेष्य पदं किम् अस्ति?

(3) अस्यां गीतायां अष्टादश अध्याया: सन्ति।

अस्मिन् वाक्ये कर्तृपदम् अस्ति –

(4) युधिष्ठिर: राजसिंहासनम् ............। अत्र क्रियापदम् चिनुत –

(ब) अधोलिखतौ संख्यावाचिशब्दौ संस्कृते लिखत् –

(1) 130 ....................

(2) 215 ....................

## [ खण्ड-ब ]

प्रश्न–4 राम: बसयानेन **ग्रामात्** जयपुरं गच्छति।

रेखांकितपदे विभक्ति तत्कारणं च लिखत्।

प्रश्न–5 ''गोपाल: ग्रामेण गच्छन् तृणं स्पृश्यति।''

वाक्यं संशोधयत।

प्रश्न–6 राजा तु **रक्षक:** भवति। रेखांकितपदे प्रश्ननिर्माणं कुरुत।

प्रश्न–7 ''सिंह: वानराभ्यां **स्वरक्षायाम्** असमर्थ: एवासीत्।''

रेखांकितपदे प्रश्ननिर्माणं कुरुत।

प्रश्न–8 अधोलिखित श्लोकस्य हिन्दीभाषायां सप्रसंग भावार्थ लिखत।

एकेन राजहंसेन या शोभा सरसो भवेत।
न सा बकसहस्रेण परितस्तीरवासिना।।

प्रश्न–9 अधोलिखित श्लोकस्य अन्वयं मञ्जूषात: पदानि चित्वा पूरयत –

संपत्तौ च विपत्तौ च महत्तामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।।

अन्वय: – उदये, सम्पतौ, अस्तमये, एकरूपता

(1) .............. च विपत्तो च (2) ............. भवति। (यथा) सविता

(3) .............. रक्त: (भवति) तथा (4) .............. च रक्त: (भवति)।

प्रश्न–10 स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्।

प्रश्न–11 'विचित्र: साक्षी' इति पाठसारं हिन्दीभाषायां लिखत।

प्रश्न–12 पर्यायपदं मेलयत।

(क) ख

(1) गजः  वायसाः

(2) काकाः  करी

(3) उरगः  प्रतिदिनम्

(4) अहरहः  सर्पः

प्रश्न–13  मंजूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरयत –

**एवः, श्वः, अपि, सदा**

(1) त्वं ................. जयपुरं गमिष्यसि।

(2) सुरेशः ............... मया सह जयपुरं गमिस्यति।

(3) अहम् ................ तिष्ठ।

## ( खण्ड-स )

प्रश्न–14  अधोलिखितं गद्यांश पठित्वा एतदाधारितम् प्रश्नानाम् उत्तराणि यथा निर्देशं लिखत –

''कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन-गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुधः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।''

(क) एकपदेन उत्तरत –

(1) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?

(2) क्रुधः कृषकः कम् उत्थापयितुं यत्नमकरोत्?

(ख) पूर्णवाक्येन उत्तरत –

(1) बलीवर्दयोः एकः कीदृशः आसीत्?

(2) कृषकः कं तोदनेन नुधमानः अवर्त्तत:?

(ग) निर्देशानुसारम् उत्तरत –

(1) 'बलीवर्दयोः' इति संज्ञापदस्य गद्यांशे सर्वनामपदं किं प्रयुक्तम्?

(2) गद्यांशे 'पपात' इति क्रियायाः कर्तृपदं किम्?

प्रश्न–15 अधोलिखितं श्लोकं पठित्वा निम्न प्रश्नानाम् उत्तराणि लिखत –

हरिततरूणां ललितलतानां माला रमणीया।<br>
कुसुमावलिः समीरचालिता स्यान्मे वरणीया।।<br>
नवमालिका रसालं मिलितां रूचिरं संगमनम्।।

(क) एकपदेन उत्तरत –

(1) हरिततरूणां माला कीदृशी?


RCScE राजस्थान स्कूल शिक्षा परिषद

(2) नवमालिका कम् मिलिता?

(ख) पूर्णवाक्येन उत्तरत –

(1) का रसालं मिलिता? तयोः संगमनं कीदृशं जातम्?

(2) कवये का वरणीया स्यात्?

(ग) यथानिर्देशम् उत्तरं लिखत –

(1) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(2) 'माला' इत्यस्य विशेष्यपदं किम्?

प्रश्न–16 अद्योलिखितं नाट्यांश पठित्वा निम्न प्रश्नानाम् उत्तराणि लिखत –

अहं प्रकृतिः युष्माकं सर्वेषां जननी? यूयं सर्वे एव मे प्रियाः। सर्वेषामेव मत्कृते महत्वं विद्यते यथासमयम् न तावत् कलहेन समयं वृथा यापयन्तु अपितु मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरूध्वम्। तद्यथा कथितम–

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम्।।

(क) एकपदेन उत्तरत –

(1) केन समयं वृथा न यापयन्तु?

(2) जीवनं कीदृशं कुरूध्वम्?

(ख) पूर्णवाक्येन उत्तरत –

(1) का सर्वेषां वन्यजीवानां जननी वर्तते?

(2) किं राज्ञः हितं नास्ति किञ्च हितम्?

(ग) यथानिर्देशम् उत्तरं लिखत –

(1) 'युष्माकं सर्वेषाम्' – इत्यत्र विशेष्यपदं किम्?

(2) 'मे प्रियाः' इत्यत्र 'मे' सर्वनामपदं कस्यै प्रयुक्तम्?

प्रश्न–17 अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत।

(1) एकदा व्याधः अरण्ये मार्गभ्रष्टः अभवत्।

(2) इत्यं व्याधः व्याघ्रात् स्वप्राणान् अरक्षत्।

(3) भीतः व्याधः समीपे विद्यमानं वृक्षम् आरूढवान्।

(4) सः प्रतिदिनम् अरण्ये आखेटं करोति स्म।

(5) कस्मिंश्चित् अरण्ये कश्चन व्याघः आसीत।

(6) तदा अकस्मात् कश्चन् व्याघ्रः व्याधस्य मार्गम् अवरुद्धवान्।

## खण्ड-द

प्रश्न-18 भवान राजकीय आदर्श उच्च माध्यमिक विद्यालयस्य दशम्या: कक्षाया: छात्र: गणेश: अस्ति। स्वकीयं प्रधानाचार्यं प्रति दिनएकस्य अवकाशार्थम् एकं प्रार्थना पत्रं लिखत –

अथवा

भवान राम: अस्ति। परीक्षापरिणामस्य विषये स्वपितरं प्रति लिखिते अस्मिन् पत्रे मञ्जूषाया: उचितपदानि चित्वा रिक्तस्थानानि पूरयतु –

[नमोनम:, प्रतिशतं, अधिकम्, नवनवति, अहम् भवान् अभ्यासेन्, परिणाम]

जयपुरम्

पूज्य पितृमहोदय

(1) ...................................... अतीव हर्षस्य विषय: अस्ति। यत् मम वार्षिक: परीक्षाया: (2) ................ आगत:। अहं नवति: (3) ................ अङ्कान् प्राप्तवान्। किन्तु इदं ज्ञात्वा (4) ................. अपि चिन्तित: भविष्यति यत् गणित विषये (5) ............. सुष्ठु: अङ्कान् प्राप्तुं समर्थ: न अभवम्। अद्य आरभ्य: अहं (6) ................ अभ्यासं करिष्यामि। आशासे यत् (7) ............... भवत: आशीर्वादेन च आगामि परीक्षायाम् अपि (8) ................... प्रतिशतं अङ्कान् प्राप्स्यामि। मातरम् – अग्रजम् प्रति अपि मम चरणस्पर्श: कथनीय:।

भवत:पुत्र:

राम:

प्रश्न-19 मञ्जूषात् उपयुक्तपदानि गृहीत्वा मातापुत्रयो: मध्ये वार्तालापं पूरयतु –

**वस्तूनि, आपणं, सायंकाले, विद्यालयस्य, गत्वा, मातुल:, भोजनं, त्वं**

भगिनी – भ्राता। ................ किं करोषि?

भ्राता – अहं मम ............. गृहकार्यं करोमि।

भगिनी – भ्राता। गृहकार्यानन्तरम् ........... गत्वा तत: दुग्धं शाकफलानि च आनय।

भ्राता – अहं ............ पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च आनेष्यामि।

भगिनी – सायंकाले न त्वं तु पूर्वमेव ............. आनय।

भ्राता – शीघ्रं किमर्थम्?

भगिनी – अद्य तव .............. आगमिष्यति अत: ............. समयात् पूर्वमेव पक्ष्यामि।

भ्राता – मातुल: आगमिष्यति चेत् अहम् इदानीम् एव गत्वा .......... क्रीत्वा आगच्छामि।

प्रश्न-20 अधोलिखितेषु – वाक्येषु केषांचित् चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरूत:।

(1) विद्यालय के चारों ओर वन है।

(2) सुरेश आँख से काणा और पैर से लँगड़ा है।

(3) पुत्र पिता से डरता है।

(4) बालक को लड्डू रुचिकर लगते हैं।

(5) कवियों में कालिदास श्रेष्ठ है।

(6) राम दशरथ के पुत्र थे।

।। सतत् अभ्यास से सुदृढ़ अधिगम की ओर बढ़े ।।

**केवल कुछ प्रश्नों के आधार पर पढ़ाई करने से भविष्य उज्ज्वल नहीं होता है। अतः ज्ञान पर ध्यान केन्द्रित करें।**




**राजस्थान स्कूल शिक्षा परिषद्**

द्वितीय एवं तृतीय तल, ब्लॉक-5, डॉ. राधाकृष्णन शिक्षा संकूल परिसर
जवाहर लाल नेरू मार्ग, जयपुर (राजस्थान)